योक्तृग्राहकौ क्रमात् ॥ कुसीदिको वार्द्धुषिको वृद्ध्याजीवश्च वार्धुषिः ॥ ५ ॥ क्षेत्राजीवः कर्षकश्च कृषिक

उ०न०

५८

धान्यसामान्यशाल्युद्भवयोः क्रमेणैकैकम् | यवस्थूलगोधूमषष्टिकोद्भवयोग्यक्षेत्राणां पृथक् पृथक्

द्वि०

कृषीवलः ॥ क्षेत्रं व्रैहेयं शालेयं व्रीहिशाल्युद्भवोचितम् ॥ ६ ॥ यव्यं यवक्यं षष्टिक्यं यवादिभव

द्वे तिलोद्भवयोग्यक्षेत्रस्य एवं माषोमाणुभंगानां द्वे द्वे रूपे यथा माषोद्भवयोग्यक्षेत्रं माष्यं माषीणं उम्यं औमीनं अण्व्यं अणवीनं | मुद्गोद्भवकोद्रवोद्भवयोग्यक्षेत्रयोः पृथक् पृथक् + वीनं भंग्यं भंगीनं ॥ २

नं हि यत् ॥ तिल्यं तैलीनवन् माषोमाणुभंगाद् द्विरूपता ॥ ७ ॥ मौद्गीनकौद्रवीणादि शेषधान्योद्भवक्ष

पूर्वमुप्तस्य पश्चात्कृष्टक्षेत्रस्य द्वे | त्रीणि सामान्येन कृष्टभूभागमात्रस्य | चत्वारि हलेन द्विवारमात्रकृष्टस्य क्षेत्रस्य

मम् ॥ बीजाकृतं तूप्तकृष्टे सीत्यं कृष्टं च हल्यवत् ॥ ८ ॥ त्रिगुणाकृतं तृतीयाकृतं त्रिहल्यं त्रिसीत्यमपि

पंच हलेन द्विवारकृष्टक्षेत्रस्य | द्रोणाढकादिपरिमितं धान्यं ययोः क्षेत्रयोः उप्यते तयोः क्षेत्रयोर्नामनी एकैकं आदिना प्रास्थिककौडविकादि ग्रहः

तस्मिन् ॥ द्विगुणाकृते तु सर्वं पूर्वं शंबाकृतमपीह ॥ ९ ॥ द्रौणाढकादिवापादौ द्रौणिका

खारीपरिमितं धान्यं यस्मिन् क्षेत्रे उप्यते तस्यैकं | त्रीणि क्षेत्रमात्रस्य

ढकिकादयः ॥ खारीवापस्तु खारीक उत्तमर्णादयस्त्रिषु ॥ १० ॥ पुंनपुंसकयोर्वप्रः केदारः क्षेत्रं

५८

अ॰ द्वे मसूरस्य । त्री कुलित्थस्य । त्रीणि सर्षपस्य । द्वि॰

५८ कोद्रवः ॥ मंगल्यको मसूरोऽथ मकुष्टकमयुष्टकौ ॥ वनमुद्गे सर्षपे तु द्वौ तन्तुभकदंबकौ ॥१७॥ सि

एकं श्वेतसर्षपस्य द्वे गहूंप्र॰ गोंहू । द्वे कुलत्थाप्र॰ । द्वे चनाप्र॰ दे॰ हरबरे प्र॰

द्धार्थस्त्वेष धवलो गोधूमः सुमनः समौ ॥ स्याद्यावकस्तु कुल्माषश्चणको हरिमंथकः ॥१८॥ द्वौ ति

निष्फले तिले तिलपेजः तिलपिंजः द्वौ स्तः रानतिल केचित् पंचमोहप्यास्प्र॰ राई दे॰ द्वे कांगुनीप्र॰ दे॰ राला

ले तिलपेजश्च तिलपिंजश्च निष्फले ॥ क्षवः क्षुधाभिजननौ राजिका कृष्णिकासुरी ॥१९॥ स्त्रियो कंगु

त्रीणि जवस प्र॰ अरसी दे॰ द्वे भांगा याबीजप्र॰ द्वे व्रीहिभेदस्य द्वे धा... भागस्य

प्रियंगू द्वे अतसी स्यादुमा क्षुमा ॥ मातुलानी तु भंगायां व्रीहिभेदस्त्वणुः पुमान् ॥२०॥ किंशारुः स

द्वे कणीसप्र॰ ... त्रीणि सर्वधान्यमात्रस्य द्वे तणादेर्गुच्छस्य त्रीणि धान्यमुकांडस्य

स्यशूकः स्यात्कणिशं सस्यमंजरी ॥ धान्यं व्रीहिः स्तंबकरिः स्तंबो गुच्छस्तृणादिनः ॥२१॥ नाडीनालं च ५८

एकं कोऽंगरशीतफलः निष्फलः सन्पलालःस्यात् एकं कोडाप्र॰ एकं श्लक्ष्णं कर्शतीक्ष्णं निशितं अग्रं
द्वे असारतुच्छ धान्यस्य बुसाप्र॰ स्यमस्य कुलस्थप्र॰ सिङ्गुरप्र॰ द्वे॰

कडंगरः स्यपलालोऽस्त्री सनिष्फलः॥कडंगरो बुसं क्लीबे धान्यत्वचि पुमांस्तुषः॥२२॥शूकोऽस्त्री श्ल-
द्वे सेंगप्र॰ द्वे मईनानेतमपनीतत्वेणसं बेहुली अपनीततुसस्य धान्यस्य द्वे एकं रामीधान्यस्य
करणे योग्यस्य धा॰ २ न्यरात्रैः

क्ष्णतीक्ष्णाग्रे समीशिंबौ त्रिषूत्तरे॥कं ऋमावुसितं धान्यं पूतंतु बहुलीकृतम्॥२३॥माषादयः शमी
एकं शूकधान्यस्य एकं शाकीप्र॰ द्वे तृणजातीयधान्यस्य

धान्यैः शूकधान्येयवादयः॥शालयः कलमाद्याश्च षष्टिकाद्याश्च पुंस्यमी॥२४॥तृणधान्यानि नी
द्वे कलईप्र॰ द्वे मुसलस्य द्वे उरवकप्र॰ ओरवरीप्र॰ द्वे द्वे सूपप्र॰

वारोः स्त्री गवेधुर्गवेधुका॥अयोग्रं मुसलोऽस्त्री स्यादुदूखलमुलूखलम्॥२५॥प्रस्फोटनं सूर्पमस्त्री
द्वे चालनीप्र॰ चलनी द्वे द्वे तरडादि के कटनिंचु द्वे वंशादिनिर्मितं भांडस्य द्वे तत्साधर्म्यं [illegible] भीणिरंधनशालायाः रसोई द्वेप्र॰
गोनीवरेती प्र॰

चालनीतितउः पुमान्॥स्यूतप्रसेवौ कंडोलपिटौ कटकिलिंजकौ॥२६॥समानौ रसवत्यां तु पाकस्थान
[illegible] महानसमित्यन्ये

अ०
५९

द्वि०

महानसे॥ पौरोगवस्तदध्यक्षः सूपकारास्तु वल्लवाः॥२७॥ आरालिका आंधसिकाः सूदा ओदनिका

गुणाः॥ आपूपिकः कांदविको भक्ष्यकार इमे त्रिषु॥२८॥ अश्मंतमुद्धानमधिश्रयणी चुल्लिरंतिका॥

अंगारधानिकांगारशकट्यपि हसंत्यपि॥२९॥ हसन्यप्यथ न स्त्री स्यादंगारोलातमुल्मुकम्॥ क्लीवें

बरीषं भ्राष्ट्रो वा कंदुर्ना स्वेदनी स्त्रियाम्॥३०॥ अलंजरः स्यान्मणिकः कर्कर्यालुर्गलंतिका॥ पिठरः

स्थाल्युखा कुंडं कलशस्तु त्रिषु द्वयोः॥३१॥ घटः कुटनिपावस्त्री शरावो वर्द्धमानकः॥ ऋचीषं पिष्टप

५९

द्वेक्षीरादि पानपात्रस्य कटोरा० एकं चर्मकृततैलपात्रस्य बुधला प्र० एकं तु धुलीप्र० पंचपात्रस्य...

चनेकंसोऽस्त्री पानभाजनम्॥३३॥ कुतूः कृत्तेः स्नेहपात्रे सैवाल्पा कुतुपः पुमान्॥ सर्वमावपनं भां

त्रीणि पकीप्र० संचीदे० द्वे भाण्डप्र० त्रीणि वास्तु काष्ठि शाकविशेषस्य भाजीप्र०

डं पात्रामत्रं च भाजनं॥३३॥ दर्विः कंविः खजाका च स्यात्तर्दूर्दारुहस्तकः॥ अस्त्री शाकं हरितकं शि

तरकारीदे० त्रीणि शाकनालस्य भाजी चेट प्र० द्वे तल्कारार्थं संस्कृतमानस्य हिंगु जीरकहरिद्रा त्रीणि चूका प्र०

ग्रुरस्य तु नाडिका॥३४॥ कडंबश्च कलंबश्च वेसवार उपस्करः॥ तिंतिडीकं च चुक्रं च वृक्षाम्लमथ वेल्लु

षट् मीरे प्र० मरिच दे० चत्वारि जीरे प्र०

जम्॥३५॥ मरिचं कोलकं कृष्णमूषणं धर्मपत्तनम्॥ जीरको जरणो जाजी कणा जीर्णो तु जीरके,

षट् काळे जीरे प्र० द्वे आल प्र० अदरख दे० चत्वारि धने प्र० धनि आदे०

॥३६॥ सुषवी कारवी पृथ्वी पृथुः कालोपकुंचिका॥ आर्द्रकं शृंगवेरं स्यादथ छत्रा वितुन्नकम्॥३७॥

175

अ०
६०

पंचशुंठीप्र०

कुस्तुंबुरुं च धान्याकमथ शुंठी महौषधम् ॥ स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम् ॥३८॥ आरना

पंचहिंगुप्र०

लकसौवीरकुल्माषाभिषुतानि च ॥ अवंतिसोमधान्याम्लकुंजलानि च कांजिकम् ॥३९॥ सहस्रवे

पंचहिंगुतरोः पत्रस्य पंचहरद्रप्र० हरदी६०

धि जतुकं बाल्हीकं हिंगु रामठम् ॥ तत्पत्री कारवी पृथ्वी बाष्पिका कबरी पृथुः ॥४०॥ निशाख्या कांच

चत्वारि मीठप्र० द्वे कद्रुलवणस्येति केचित् सैंधवप्र०

नी पीता हरिद्रा वरवर्णिनी ॥ सामुद्रं यत्तु लवणमक्षीवं वशिरं च तत् ॥४१॥ सैंधवोऽस्त्री शीतशिवं

द्वे सांभरि लवण प्र० द्वे कृत्रिम लवण खारारी प्र० त्रीणि गांधवीड प्र० एकं काला गांधवीड प्र०

माणिमंथं च सिंधुजे ॥ रौमकं वसुकं पाक्यं बिडं च कृतके द्वयम् ॥४२॥ सौवर्चलेऽक्षरुचके तिलकं

सोंचर दे० एकं स्वसोंचर प्र०

६०

176

द्वे गडी साकरम॰ रावकेचित् द्वे साकरम॰ द्वे दधासरक्षीरपक्वस्य

खंडस्य गोडत्रा पलानिरारी

द्वे श्रीखंडम॰ मुरनंदे॰

तत्र मेचके। मत्स्यण्डी फाणितं खंडविकारे, शर्करा सिता ॥४३॥ कूर्चिका क्षीरविकृतिः स्याद्रसाला

२स्या, तु मार्जिता॥ तेमनं तु निष्ठानं त्रिलिंगा वासितावधेः॥४४॥ शूलाकृतं भटित्रं च शूल्यमुख्यं तु पैठरम्॥

प्रणीतमुपसंपन्नं प्रयस्तं स्यात्सुसंस्कृतम्॥४५॥ स्यात्पिच्छिलं तु विजिलं संमृष्टं शोधितं समे॥

चिक्कणं मसृणं स्निग्धं तुल्ये भावितवासिते॥४६॥ आपक्वं पौलिरभ्यूषो लाजाः पुंभूम्नि चाक्षताः॥

द्वे दधिमिश्रितसक्तोः

पि१ पृथुकः स्याच्चिपिटको धाना भृष्टयवे स्त्रियः॥४७॥ पूपोऽपूपः पिष्टकः स्यात्करंभो दधिसक्तवः॥

अ० षट्भक्तस्य भानम्० ६ द्वे दग्धभक्तस्य एकं सर्वरसाग्रभागस्य ६

६१ भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ॥४८॥ भिस्सटा दग्धिका सर्वरसाग्रे मण्डमस्त्रि-

त्रीणि भक्तोद्भवमंडस्य पंचपेयानाम्०

याम् ॥ मासराचामनिःस्रावा मण्डे भक्तसमुद्भवे ॥४९॥ यवागूरुष्णिका श्राणा विलेपी तरला च सा ॥

गोर्विकारः गव्यं अवयवी वा सर्वं गिरा द्रव्याच्यं
एकं दधिदुग्धादेः द्वे गोमयस्य० गोवरे० एकं गोचरीषस्य० त्रीणि दुग्धस्य०

गव्यं त्रिषु गवां सर्वं गोविड्गोमयमस्त्रियाम् ॥५०॥ तत्तु शुष्कं करीषोऽस्त्री दुग्धं क्षीरं पयः समम् ॥

एकं दधिघृतादेः एकं पातलदध्नः चत्वारि घृतस्य ४ द्वे लोणीम्० नवनीते०

पयस्यमाज्यदध्यादि द्रप्सं दधि घनेतरत् ॥५१॥ घृतमाज्यं हविः सर्पिर्नवनीतं नवोद्धृतम् ॥

एकं एकरात्रपर्युषितदुग्धे उत्पन्नस्य घृतस्य चत्वारि सामान्यतक्रस्य ४ कर्मेपाणीप्रदानिर्जलादि

तत्तु हैयङ्गवीनं यद्ध्योगोदोहोद्भवं घृतम् ॥५२॥ दण्डाहतं कालशेयमरिष्टमपि गोरसः ॥ तक्रं ह्यु- ६१

एकं दध्नो चीसायम० एकं नवप्रसूतायाः गोः सप्तदिना त्रीणि क्षुधः
बधिपयसः

दश्विन्मथितं पादांब्वर्धांबु निर्जलम् ॥ ५४ ॥ मंडं दधिभवं मस्तु पीयूषोऽभिनवं पयः ॥ अशनाया बु

द्वे ग्रासस्य द्वे बहुभिः संभूयैकपात्रे पानस्य द्वे समितस्य भोजनस्य चत्वारि पिपासायाः

भुक्षा क्षुद्ग्रासस्तु कवलः पुमान् ॥ ५५ ॥ सपीतिः स्त्री तुल्यपानं सग्धिः स्त्री सहभोजनम् ॥ उदन्या तु पि

४ सतभोजनस्य त्रीणि तृप्तेः

पासा तृट् तर्षो जग्धिस्तु भोजनम् ॥ ५६ ॥ जेमनं लेह आहारो निघासो न्याद इत्यपि ॥ सौहित्यं तर्पणं

द्वे उच्छिष्टस्य षट् यथेष्टभोजनस्य षट् गोपालस्य

तृप्तिः फेला भुक्तसमुज्झितम् ॥ ५७ ॥ कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ॥ गोपे गोपाल

एकं गोमहिष्यादिकस्य त्रीणि गोस्वामिनः ३

गोसंख्यगोधुगाभीरवल्लवाः ॥ ५८ ॥ गोमहिष्यादिकं पादबंधनं द्वौ गवीश्वरे ॥ गोमान् गोमी गोकु

७० श्रीणिगोसमूहस्य — क्षेपक द्वे पूर्वयस्मिंस्थले गावः आशिताः तस्य — क्षेपक नवर्षभस्य — द्वि०

८२ सं तु गोधनं स्याद्गवां व्रजो ॥ त्रिष्वाशितंगवीनं तद्गावो यत्राशिताः पुरा ॥ उक्षा भद्रो बलीवर्दः

एकं ऋषभमात्रस्य — द्वे गोमात्रस्य

ऋषभो वृषभो वृषः ॥ ५९ ॥ अनड्वान्सौरभेयो गौरुक्ष्णां संहतिरौक्षकम् ॥ गव्या गोत्रा गवां वत्सधेन्वो

यथासंख्यं वत्सधेनुसंघयोः एकैकं — एकं महावृषभस्य — द्वे वृद्धवृषभस्य — द्वे अप्राप्तवृषभावस्य बलीवर्दभावस्य — क्षेपक

र्वात्सकधैनुके ॥ ६० ॥ वृषो महान्महोक्षः स्याद्वृद्धोक्षस्तु जरद्गवः ॥ उत्पन्न उक्षा जातोक्षः स

द्वे तत्कालोत्पन्नवत्सस्य — द्वे पूर्वविलक्षणस्य वत्सस्य — द्वे ईषद्युवत्वयुक्तं किंचित्प्राप्तौ — द्वे अंडाकर्षणोचितस्य — क्षेपक नाम सम्यक् — स्वबलीवर्दभावस्य

द्यो जातस्तु तर्णकः ॥ ६१ ॥ शकृत्करिस्तु वत्सः स्याद्दम्यवत्सतरौ समौ ॥ आर्षभ्यः षण्डतायोग्यः

श्रीणिसांड — एकं स्कंधदेशस्य — द्वे गवां गलेलंबमानचर्मणः — द्वे रज्जुस्यूतनासां गस्य महिषवृषादेः

षंडो गोपतिरिट्चरः ॥ ६२ ॥ स्कंधदेशस्तु स्य वहः सास्ना तु गलकंबलः ॥ स्यान्नस्तितस्तु नस्योतः प्र ८२

रम्यानां रमनार्थस्कंधे यकाष्ठमासज्यते तत्प्रासंगः

द्वे रमनार्थस्कंधे पार्श्वे चि बध्वा भ्राम्यमाणस रम्यस्य

युगप्रासंगशाकटवहानां क्रमेणैकैकं पृथक् पृथक्

हलेन सीरेण चरखनति तयोर्वोढा तस्येद

ष्ठवाड्युगपार्श्वगो ॥ ६३ ॥ युगादीनां तु वोढारो युग्यप्रासंग्यशाकटाः ॥ खनंति तेन तद्वोढास्येदं हालि

मिसर्व्व दे नाम्नि पंचलांगलादि वहनस्याश्वृषादेः एकस्यैव रथस्य लांगलस्य वायो धुरं वहति सैकधुरीणादि पदत्रयवाच्यः

कसैरिकौ ॥ ६४ ॥ धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः ॥ उभावेकधुरीणैकधुरावेकधुरावहे ॥ स

द्वे सर्वधुरावहस्य नव स्त्री गव्याः

तु सर्वधुरीणो यो भवेत्सर्वधुरावहः ॥ माहेयी सौरभेयी गौरुस्रा माता च शृंगिणी ॥ ६६ ॥ अर्जुन्य

एकं उत्तमगव्याः वर्णादीत्यादि नामप्रमाणावयवभेदस्महः शबली धवला इत्यस्यैतानि नामानि स्युः धवली शवली वत्स

माणस्तेतद्दृष्ट्यां नामनी स्यादिप्रयोगः अवयवभेदात् लंबकर्णी वक्रशृंगी साद्दयः

घ्न्यारोहिणी स्यादुत्तमा गोषु नैचिकी ॥ वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ॥ ६७ ॥ द्विहाय

द्वे द्विवर्षायाः गोः द्वे एकवर्षायाः गोः द्वे चतुर्वर्षायाः गोः द्वे त्रिवर्षायाः गोः द्वे वंध्यायाः गोः वांस्य

नी द्विवर्षा गौरेकाब्दा त्वेकहायनी ॥ चतुरब्दा चतुर्हायण्येवं त्र्यब्दा त्रिहायणी ॥ ६८ ॥ वशा वंध्याव

अ० ६३

द्वे देववशा स्रवित गर्भायाः गोः एकं निष्पादितमैथुनायाः गोः द्वे अनन्तावर्षि घोपगमनात् स्याः गर्भघातुः स्यात् तस्याः द्वे प्रथमगर्भग्रहणे प्राप्तकाला याः गोः

तोका तु स्रवद्गर्भा ऽथ संधिनी॥ आक्रान्ता वृषभेणाथ वेहद्‌ गर्भोपघातिनी॥ ६९॥ काल्योपसर्या प्र

द्वे प्रथमं गर्भिण्याः द्वे सुशीलायाः गोः द्वे बहुप्रसूतायाः गोः द्वे चिरसूतायाः गोः

जने प्रष्ठौही बालगर्भिणी॥ स्यादचण्डी तु सुकरा बहुसूतिः परेष्टुका॥ ७०॥ चिरसूता वष्कयणी

द्वे नवप्रसूतायाः गोः द्वे सुखेन संदोह्यते या तस्याः द्वे स्थूलोधस्को गोः द्वे द्रोणपरिमितदुग्धस्रवणवत्याः

धेनुः स्यान्नवसूतिका॥ सुव्रता सुखसंदोह्या पीनोध्नी पीवरस्तनी॥ ७१॥ द्रोणक्षीरा द्रोणदुग्धा

एकं बन्धनस्थानस्थितायाः गोः एकं प्रतिवर्षप्रसूतायाः गोः द्वे कासम०

धेनुष्या बन्धके स्थिता॥ समांसमीना सा यैव प्रतिवर्षं प्रसूयते॥ ७२॥ ऊधस्तु क्लीबमापीनं समौ

द्वे गोस्तनस्य द्वे दामन० द्वे दामन० पंचरविम० मथानीदे०

शिवककीलकौ॥ न पुंसि दामसंदानं पशुरज्जुस्तु दामनी॥ ७३॥ वैशाखमन्थमन्थानमन्थानो मन्थ ६३

१८२

द्वे घुसलनखांबस्य० द्वे मथ्यमान द्रव्याधारस्य चलाउंटस्य० उंटदे० एकं उष्ट्रशिशोः

दंडकै॥ कुठरोदंड विष्कंभौमंथनीगर्गरीसमे॥ ७४॥ उष्ट्रेक्रमेलकमयमहांगाः करभः शिशौ॥ क

एकं पलायनप्रतिबंधाय काष्ठकृतपादबंधनयुतकरभस्य द्वेसेलीस्य० बकरीदे० पंचबोकडस्य० बेकरादे०

रभाः स्युः शृंखलकादारवैः पादबंधनैः॥ ७५॥ अजाछागीशुभच्छागबस्तच्छगलकाअजे॥ मेढ्रो

ससयेडकास्य० मेंढादे० उष्ट्रोरभ्राजानां वृंदे क्रमेण पृथक् पृथक् एकैकं पंचरासभस्य

रभ्रोरणोर्णायुमेषवृष्णयएडके॥ ७६॥ उष्ट्रोरभ्राजवृंदेस्यादौष्ट्रकौरभ्रकाजकम्॥ चक्रीवंतस्तु, दौर

अष्टौ वाणिज्यकर्मकर्तुः

वालेयारासभागर्द्दभाः खराः॥ ७७॥ वैदेहकः सार्थवाहोनैगमोवाणिजोवणिक्॥ पण्याजीवोह्या

द्वे विक्रेतुः द्वे क्रेतुः द्वे वणिक्कर्मणः

पणिकः क्रयविक्रयिकश्चसः॥ ७८॥ विक्रेतास्याद्विक्रयिकः क्रायिकक्रयिकौसमौ॥ वाणिज्यं

अ० द्वि०

६४

त्रीणि मूल्यस्य — त्रीणि अधमर्णाय दत्तधनस्य द्रव्यं दत्तम् — द्वे मूलधनविक्रयादधिके लभ्यते तल्लाभशब्दवाच्यं

तुवलिज्योत्स्या, मूल्यं वस्नोऽप्यवक्रयः ॥ ८१ ॥ नीवी परिपणो मूलधनं लाभोऽधिकं फलम् ॥ परिदानं

चत्वारि एकं वस्तु दत्वा तन्मूल्यम् अपरवस्तुग्रहणस्य द्वे अन्यस्य समीपे स्थापितद्रव्यस्य एकं स्वामिन्यस्तद्रव्य केतारः क्रीणीयुरिति बुध्या आपणे प्रसारितद्रव्यस्यैकं प्रसर्पणस्य

परीवर्तो नैमेयनिमयावपि ॥ ८२ ॥ पुमानुपनिधिर्न्यासः प्रतिदानं तदर्पणम् ॥ क्रये प्रसारितं क्रे

द्वे क्रेतुं स्थितक्रयणयोग्यद्रव्यस्य — त्रीणि विक्रेयद्रव्यस्य — त्रीणि सत्यमिति वचनरूपायाः क्रियायाः

य्यं क्रेयं क्रेतव्यमात्रके ॥ ८३ ॥ विक्रेयं पणितव्यं च पण्यं क्रय्यादयस्त्रिषु ॥ क्लीबे सत्यापनं सत्यंका

आदेरोति दशशब्दश्रुतिपर्यन्तं अष्टादशपर्यन्तं एकादिकाः संख्येयेऽद्रव्येऽवर्तन्ते तेन तद्धारणे तेन तत्सामानाधिकर
ण्येनैव तासां वृत्तिरित्यर्थः यथा एको विप्रो द्वावुपास्यन्ति तत्तु सामानाधिकरण्ये न वृत्तिरिति तेन त्रीणि विप्रस्य दशविप्राणामित्यादिः

रः सत्याकृतिः स्त्रियाम् ॥ ८४ ॥ विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः ॥ संख्यार्थे द्विबहुत्वे

विंशतिविंशत्याद्याः सर्वा एव संख्याः संख्येये संख्यार्थे अभिधेये विंशत्यादयो धर्मं तेन तत्र सामानाधिक योऽन्तवाच्यं संख्यापरिमाणे स
रण्यादुपचारेण तेभ्यो द्वितीयो न बहुवचनं विंशतिः भवतः यथाह विंशतिर्विंशत्यो विंशतय इति सामानाधिकरण्ये

स्तासु चानवतेः स्त्रियः ॥ ८५ ॥ पङ्क्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम् ॥ यौतवं द्रवयं पाय्यमिति

द्वे विक्रयक्रियायाः — भावे विंशतिर्गवां विंशतिर्गवां विंशतय इति नेति तासु विंशत्यादि संख्यासु आनवतेः नवतिं
मर्यादीकृत्याभिव्याप्य भिन्नलिङ्गेनापि सामानाधिकरण्ये स्त्रियः स्त्रीलिङ्गाः यथा विंशतिः

२ विपणो विक्रयः संख्याः संख्येये ह्यारात्रिषु ॥ पुरुषेः कृतो विंशतिः कुडानीति विंशतिश्रुतिरष्टाविंशतिर्यावत्

मानंत्रिधा तुलांगुलिप्रस्थभेदात् भवति तुल्यग्रहणेनोन्मानमुपलक्ष्यते अंगुल्या हस्तादेः प्रस्थेन द्रोणाढकादि   एकं पंचगुंजा माषकस्य   द्वे कर्षस्य   एकं पलस्य

मानार्थकं त्रयम् ॥ ८४ ॥ मानं तुलांगुलिप्रस्थैर्गुंजाः पंचाद्यमाषकः ॥ ते षोडशाक्षः कर्षोऽस्त्री पलं कर्ष

द्वे षोडशमाषात्मकसुवर्णकर्षस्य   एकं सुवर्णपलस्य   एकं तुलायाः   एकं भारस्य

चतुष्टयम् ॥ ८५ ॥ सुवर्णबिस्तौ हेम्नोक्षे कुरुबिस्तस्तु तत्पले । तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तु

एकं आचितस्य   एकं शाकटभारस्य   द्वे कार्षापणस्य

ला: ॥ ८६ ॥ आचितो दश भाराः स्युः शाकटो भार आचितः ॥ कार्षापणः कार्षिकः स्यात् कार्षिके ता

एकं अशीतिगुंजात्मकताम्रपणस्य   आढकादिसमानाख्ये नाम मसिद्धानां पृथक् पृथगेकैकम्

स्त्रीपादो मानीस्वीप्रस्थद्रोणः द्रोणो आढकः आढकः प्रस्थः प्रस्थपादः कुडवः कुडवपादो निचकः स च प्रस्तृतः ख्यातः विंशतिश्च भिर्वहः

म्रिके पणः ॥ ८७ ॥ अस्त्रियामाढकद्रोणौ खारी वाहो निकुंचकः ॥ कुडवः प्रस्थ इत्याद्याः परिमा

एकं चतुर्थांशस्य   त्रीणि भागस्य   अवयवोऽशो सामान्येन धनस्य

णार्थकाः पृथक् ॥ ८८ ॥ अंशस्तुरीयः पादः स्याद्दशभागे तु वंटकः ॥ द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं व

८३

अ०

६५

द्वे घटिताघटितयोर्हेमरूप्ययोः

हि०

सु॥ ९१॥ हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि। स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते॥ ९२॥

एकं हेमरूप्यादि मितात्मा एकं कुप्य... त्रीणि माणिक्यस्य

ताभ्यां यदन्यत्तत्कुप्यं रूप्यं तद्द्वयमाहतम्॥ गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः॥ ९३॥ शोणरत्नं

द्वे मोतीस्य० द्वे विद्रुमस्य द्वे रत्नसामान्यस्य मुक्तादेश्च

लोहितकः पद्मरागोऽथ मौक्तिकम्॥ मुक्ताऽथ विद्रुमः पुंसि प्रवालं पुन्नपुंसकम्॥ ९३॥ रत्नं मणिर्द्वयो

ऊनविंशतिः सुवर्णस्य

रश्मजातौ मुक्तादिकेऽपि च॥ स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्॥ ९४॥ तपनीयं शातकुंभं गांगे

यं भर्म कर्बुरम्॥ चामीकरं जातरूपं महारजतकांचने॥ ९५॥ रुक्मं कार्त्तस्वरं जांबूनदमष्टापदोऽस्त्रि

६५

186

द्वे नालंकारस्य सुवर्णस्य पंच रजतस्य चांदीम० द्वे पीतलम०

याम्॥ अलंकारसुवर्णं यच्छृंगीकनकमित्यपि॥९६॥ दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि॥ रीतिः स्त्रि

षट् ताम्रस्य० क्षेपक

यां स्यादारकूटो न स्त्रियामथ ताम्रकम्॥९७॥ शुल्बं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुंबराणि च॥ सुवर्णर

क्षेपक सप्तलोहस्य

जतं ताम्ररीतिकांस्यं तथा त्रपु॥९८॥ सीसं च चामरं चैव ह्यष्टौ लोहानि वक्ष्यते॥ लोहोऽस्त्री शस्त्रकं

८ द्वे लोहमलस्य एकं सुवर्णाद्यष्टविधतैजसस्य

तीक्ष्णं पिंडं कालायसायसी॥९९॥ अश्मसारोऽथ मंडूरं सिंहाणमपि तन्मले॥ सर्वं तु तैजसं लोहं वि

एकं फालादिलोहविकारस्य० द्वे काचस्य० चत्वारि पारदस्य० एकं माहिषशृंगस्य त्रीणि अभ्रकस्य

कारस्त्वयसः कुशी॥१००॥ क्षारः काचोऽथ चपलो रसः सूतश्च पारदे॥ गवलं माहिषं शृंगमभ्रकं गि

187

अ० चत्वारि सुरमांसप्र० चत्वारि मौरचूतप्र० तूतियारि० हि०

रिना, मलेः ॥ १०१ ॥ स्रोतोंऽञ्जनं तु सौवीरं कापोतं जननयासुनं ॥ तुत्थां जनं शिखिग्रीवं वितुन्नकं मयूरकं ॥

९९

त्रीणि सूरु हरिद्रा धाथोद्भवा जननस्य हुपार दासन्नतार्क्ष्यशैलम् त्रीणि गंधकप्र०

१०२ ॥ कर्परी रार्विका धाथोद्भवं तु रसांजनम् ॥ रसगर्भं तार्क्ष्यशैलं गंधाश्मा नितु गंधकः ॥ १०३ ॥

त्रीणि कुलस्था कार शिलां जनभेदस्य चत्वारि मितके यामळप्र०

सौगंधिकं च चक्षुष्या कुलाल्यौ तु कुलत्थिका ॥ रीति पुष्पं पुष्पकं च पौष्पकं कुसुमांजनम् ॥ १०४ ॥ पि

पंच हरतालप्र० पंच गडफलप्र० शिला जीतदे० पट्टबोलप्र०

जरं पीतनं नं तालमालं च हरितालकं ॥ गैरेयमश्मजं गिरिजमश्मजं च शिलाजतु ॥ १०५ ॥ बोलगंधरसप्रा

त्रीणि समुद्रफेनप्र० द्वे सिंदूरस्य चत्वारि सीसप्र०

णपिंडगोपरसाः समाः ॥ डिंडीरोऽब्धिकफः फेनः सिंदूरं नागसंभवम् ॥ १०६ ॥ नागसीसकयोगेष्टव ९९

चत्वारि रंगप्र० द्वे कापुसप्र० रुई द्वे चत्वारि कुसुंभप्र०

प्राणिं त्रपु पिच्चटम्॥ रंगवंगे अथ पिचुस्तूलोः थ कमलोत्तरम्॥ १०७॥ स्यात् कुसुंभं वह्निशिखं

द्वे मेषलोमनिर्मितकंबलस्य द्वे शशलोमनिष्पन्नकंबलस्य त्रीणि सहतप्र० द्वे मैनप्र०

महारजनमित्यपि॥ मेषकंबल ऊर्णायुः शशोर्णा शशलोमनि॥ १०८॥ मधुसोद्दं माक्षिकादि सिक्थं

मनःशिलप्र०

क्लीबं तु सिक्थकम्॥ मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका॥ १०९॥ नैपाली कुनटी गोला यव

त्रीणि यवक्षारप्र० पंच सर्जक्षारप्र०

क्षारो यवाग्रजः॥ पाक्यो थ सर्जिकाक्षारः कापोतः सुखवर्चकः॥ ११०॥ सौवर्चलं स्याद्रुचकं त्व

द्वे वंशलोचनप्र० द्वे शोभांजनबीजस्य एकं इक्षुमूलस्य त्रीणि पिप्पलीमूलस्य

क्क्षीरी वंशलोचनौ॥ शिग्रुजं श्वेतमरिचं मोरटं मूलमैक्षवम्॥ १११॥ ग्रंथिकं पिप्पलीमूलं चट

अ० द्वि०

काशिरं द्रव्य पि॥ गोलोमी भूतकेशो नापत्रांगं रक्तचंदनम्॥ ३३॥ त्रिकटु त्र्यूषणं व्योषं त्रिफला राबलेराअंवरा

तु फलत्रिकम्॥ १९३॥ इति वैश्यवर्गः समाप्तः॥ अथ शूद्रवर्गः॥ शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः॥ १॥ आ

चंडालात्तु संकीर्णा अंबष्ठकरणादयः॥ २॥ शूद्राविशोस्तु करणोंऽबष्ठो वैश्याद्विजन्मनोः॥ शू

द्राक्षत्रिययोरुग्रो मागधः क्षत्रियाविशोः॥ ३॥ माहिष्योर्याक्षत्रिययोः क्षत्तार्याशूद्रयोः सुतः॥

ब्राह्मण्यां क्षत्रियात्सूतस्तस्यां वैदेहको विशः॥ ४॥ रथकारस्तु माहिष्यात्करिण्यां यस्य संभवः॥ द्वि०

द्वे तक्षा तंत्रवाय नापित रजक चर्मकार एते कारवः ते कारुभिः सजातीयैर्मिलितैः श्रेणिः स्यात्

एकं ब्राह्मण्यां शूद्रादुत्पन्नस्य राणां कारुशिल्पिशब्दवाच्यानां

स्याच्चंडालस्तु जनितो ब्राह्मण्यां वृषलेन यः॥४॥ कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः

द्वे कारुसंघमुख्यस्य द्वे माली प्र० द्वे कुंभकारस्य द्वे कोष्टी प्र० कोरी दे०

कुलकः स्यात्कुलश्रेष्ठी मालाकारस्तु मालिकः॥५॥ कुंभकारः कुलालः स्यात्पलगंडस्तु लेपकः॥ तंतुवा

द्वे लिंपी प्र० दरजी दे० द्वे चितारी प्र० नकाशी चितेरा दे० द्वे शिकलीगर प्र० द्वे चांभार प्र० चमार दे०

यः कुविंदः स्यात्तुन्नवायस्तु सौचिकः॥६॥ रंगाजीवश्चित्रकरः शस्त्रमार्जोसिधावकः॥ पादुकृच्च

चत्वारि सोनार प्र० द्वे कासार प्र० ठठेरा दे०

द्वे लोहार प्र०

र्मकारः स्याद्व्योकारो लोहकारकः॥७॥ नाडिंधमः स्वर्णकारः कलादो रुक्मकारकः॥ स्याच्छांखिकः कां

द्वे तांबटकार प्र० ठठेरा दे० पंचसुतार प्र० बढई दे० क्षेमक एकं गावचा सुतार प्र०

बविकः शौल्विकस्ताम्रकुट्टकः॥८॥ तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट्॥ ग्रामाधीनो ग्रामत

अ० एकं अजाजीवस्तु तारम० पंचतमाकी म० माऊदे० द्वे धोबी म० परीट द्वे कलारम० द्वि०

द्वि८

क्षेः कोरः तक्षौन्नृधीनकः ॥९॥ क्षुरी मुंडी दिवाकीर्ति नापितांतावसायिनः ॥ निर्णेजकः स्याद्रजकः शौं

द्वे धन गरम० गड्डरिआड्डे० द्वे देवकुलादौ पर्ननंटलीला द्वे द्वं इन्द्रजालादि माया शांबरी मायाः द्वे मायाकारस्य

डिको मंडहारकः ॥१०॥ जाबालः स्यादजाजीवो देवाजीवीस्तु देवलः ॥ स्यान्माया शांबरी मायाकारस्तु प्रति

षट् नटस्य द्वे नट विशेषाणां शैलूषकथकानामिसन्ये

हारिकः ॥११॥ शैलालिनस्तु शैलूषो जायाजीवाः कृशाश्विनः ॥ भरता इत्यपि नटाश्चारणास्तु कुशीलवाः

द्वे मृदंगवादकस्य द्वे पाणिवादकस्य द्वे वेणुवादकस्य द्वे वीणावादकस्य

॥१२॥ मार्दंगिका मौरजिकाः पाणिवादास्तु पाणिघाः ॥ वेणुध्माः स्युर्वैणविका वीणावादास्तु वैणिकाः ॥

पारधी म० द्वे वर्त्तनार्थं पक्षिघातकस्य द्वे जालेन मृगबंधन २ कर्तुः औणिपशुपक्षिणो रत्नामांसविक्रयेण जीवतः कसाई म०

कौः ॥१३॥ जीवांतकः शाकुनिको द्वौ वागुरिकजालिकौ ॥ वैतंसिकः कौटिकश्च, मांसिकश्च समं त्रयम् ॥१४॥ द्वि८

दशानि हीनजातिकर्मणोवर्वरस्य

चत्वारि वेतनजीविनः कर्मकर्तुः ४ द्वे कासिद प्र० द्वे भारवाहकस्य

भृतको भृतिभुक् कर्मकरो वैतनिकोऽपि सः ॥ वार्तावहो वैवधिको भारवाहस्तु भारिकः ॥ १५ ॥ विवर्णः पा

एकादशहीनकस्य

१०

मरो नीचः प्राकृतश्च पृथग्जनः ॥ निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥ १६ ॥ भृत्ये दासेय

चत्वारि औदासि त्यैपरपोषितस्य

दासेरदासगोप्यकचेटकाः ॥ नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः ॥ १७ ॥ पराचितपरिस्कं

षट् आलसस्य ४ षट् दक्षस्य

दपरजातपरैधिताः ॥ मंदस्तुंदपरिमृजः आलस्यः शीतकोलसोनुष्णः ॥ १८ ॥ दक्षेतु चतुरपेशलप

दश चांडालस्य

टवः सूत्थान उष्णश्च ॥ चंडालः प्लवमातंगदिवाकीर्तिजनंगमाः ॥ १९ ॥ निषादश्वपचावंतेवासि

एते किरातादयस्त्रयः चंडालानां भेदाः म्लेच्छशब्दवाच्याश्च ॥ मयूरपिच्छपरिधानः किरातः पत्रपरिधानः शबरः स्वभाषाव्य
गोमांसभक्षकोयस्तु लोकबाह्यं च भाषते ॥ सर्वाचारविहीनोसौ म्लेच्छ इत्यभिधीयते ॥१॥ चत्वारि जीवनार्थं मृगघातकस्य

अ० द्वि०

ण्डालपुक्कसाः ॥ भेदाः किरातशबरपुलिन्दाम्लेच्छजातयः ॥२०॥ व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः

द्वि०

सप्तकुत्तराप्र० कुकुरप्र० एकसुन्मत्तशुनः श्वोरहा कुकुरप्र०

पिसः ॥ कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ॥२१॥ शुनको भषकः श्वा स्यादलर्कस्तु स योगितः ॥

एकं शिकारी कुत्ताप्र० द्वे कुतरीप्र० कुतियाहि० एकं ग्राम्यथकरस्य एकं तरुणपशुमात्रस्य चत्वारि शिकारप्र०

श्वा विश्वकद्रुर्मृगयाकुशलः सरमा शुनी ॥२२॥ विट्चरः शूकरो ग्राम्यो वर्करस्तरुणः पशुः ॥ आच्छो

एकं व्याधेन दक्षिणांगे व्रणस्य हरिणस्य द्वयचौरस्य

दनं मृगव्यं स्यादाखेटो मृगया स्त्रियाम् ॥२३॥ दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्मा कुरंगकः ॥ चौरैकागा

चत्वारि चौरकर्मणः

रिकस्तेनदस्युतस्करमोषकाः ॥२४॥ प्रतिरोधिपरास्कंदिपाटच्चरमलिम्लुचाः ॥ चौरिकास्तैन्य द्वि०

एकं चौरिकाधनस्य　　एकं मृगादिबंधनयंत्रस्य　　द्वे आमिषं दत्वा मृगपक्षिबंधनार्थं यत्संधानयंत्रं निबध्यते तस्य

चौर्यं च स्तेयं लोप्त्रं तु तद्धनम् ॥२५॥ वीतंसस्तूपकरणं बंधने मृगपक्षिणाम् ॥ उन्माथः कूटयं

द्वे मृगबंधनार्थं जालो वृतेषस्य　　पंच दोरीप्र०　　ग्रहेः रहरहः येन यंत्रेण जलमुद्धो स्यते तस्य द्वे नाम्नि　　चाक प्र०

त्रं स्याद्वागुरा मृगबंधनी ॥२६॥ शुल्बं वराटकः स्त्री तु रज्जुस्त्रिषु वटी गुणः ॥ उद्घाटनं घटीयंत्रं

द्वे वस्त्रादीनां वेष्टनदंडस्य　　द्वे सूत्रस्य सूत्र प्र०　　द्वे वस्त्रादीनां वयनक्रियायाः

सलिलोद्वाहनं प्रहेः ॥२७॥ पुंसि वेमा वायदंडः सूत्राणि नरितंतवः ॥ वाणिर्व्यूतिः स्त्रियौ तुल्ये

एकं लेख्यादिशिल्पकर्मणः　　द्वे पुतली प्र०　　क्षेपक

पुस्तं लेख्यादिकर्मणि ॥२८॥ पांचालिका पुत्रिका स्याद्वस्त्रदंतादिभिः कृता ॥ जतु त्रपु विकारे तु जा

क्षेपक　　चत्वारि संदूक प्र०　　द्वे कावड प्र०　　बहिंगी　　द्वे　　द्वे तीक प्र०

तुषं त्रापुषं त्रिषु ॥२९॥ पिटकः पेटकः पेटा मंजूषाथ विहंगिका ॥ भारयष्टिस्तदालंबि शिक्यं काचौ

३१० त्रीणि जोडाप्र० पनहीदे० एकं वाहणाप्र० त्रीणि चमरज्वोः वादीप्र० हि०

७० अथ पादुका॥३०॥ पादूरुपानत्स्त्री सैवानुपदीना पदायता॥ नद्ध्रीवर्ध्री वरत्रा स्यादश्वादेस्ताडनी,

एकं कोरडाप्र० त्रीणि कोहकाप्र० किंगरीदे० द्वे सुवर्णादि तुलायाः ताजवाप्र० त्रीणि कसोटीप्र०

कशा॥३१॥ चांडालिका तु कंडोलवीणा चंडालवल्लकी॥ नाराची स्यादेषणिका शाणस्तु निकषः क

द्वे सुवर्णादि छेदिकायाः आवर्तितम् नाव रतिवासुवर्ण तुपालि भिन्नते तस्या द्वे नाम्नी द्वे मूसप्र० द्वे भाताप्र०

षः॥३२॥ व्रश्चनः पत्रपरशुरीषिका तूलिके समे॥ तैजसावर्तनी मूषा भस्त्रा चर्मप्रसेविका॥३३॥

द्वे सुक्तादि वेधनयंत्रस्य द्वे कातरीप्र० कैची द्वे कुकरप्र० वसलाप्र० द्वे टाकी द्वे करवतप्र०

वृ२ आस्फोटनी वेधनिका कृपाणी कर्तरी समे॥ वृक्षादनी वृक्षभेदी टंकः पाषाणदारणः॥ क्रक

द्वे रांपीप्र० त्रीणि लोहप्रतिमायाः एकं नृत्यादि चतुःषष्टिवार्त्या त्रिं [illegible] भरतचतुःषष्टि क्रियाणां

चः करपत्रं स्यादारा चर्मप्रभेदिका॥ सूर्मी स्थूणायःप्रतिमा शिल्पं कर्मकलादिकम्॥३५॥ प्रति ७०

हेकरणेभावेपि येनोपमीयतेयाचोपमि
तयोरेतेनाति
अष्टौमूर्त्तिसदृशशिलादिनिर्मितप्रतिरूपकस्य

मानंप्रतिबिंबंप्रतिमाप्रतियातनाप्रतिछाया॥प्रतिकृतिरर्चापुंसिप्रतिनिधिरुपमोपमानंस्या

एतेसमादयःसप्ततुल्यार्थवाच्यलिंगास्सु

त्॥३६॥वाच्यलिंगाःसमस्तुल्यःसदृक्षःसदृशःसदृक्॥साधारणःसमानश्चस्युरुत्तरपदेत्व

निभादयःपंचउत्तरपदस्थाएववाच्यलिंगाःसदृशवचनास्युरिएकादशवेतनस्य
तिपूर्वस्मात्विशेषःयथापितेनिभःपुत्रःआदित्यनिभंता

मी॥३७॥निभसंकाशनीकाशप्रतीकाशोपमादयः॥कर्मण्यातुविधाभृत्याभृतयोभर्मवेतनम्

सुरादिनवमदिरामद्यसामान्यस्य

॥३८॥भरण्यंभरणंमूल्यंनिर्वेशःपणइत्यपि॥सुराहलिप्रियाहालापरिस्रुद्वरुणात्मजा॥

एकंमद्यपानरचिजनकस्य

॥३९॥गंधोत्तमाप्रसन्नेराकादंबर्यःपरिस्रुता॥मदिराकश्यमद्येचाप्यवदंशस्तुभक्षणम्॥४०॥

197

त्रीणिमद्यपानस्थानस्य द्वे पुनःपुनर्मद्यपानक्रमस्य चत्वारि मधुकपुष्पकृतमद्यस्य

७० सुरापानं मदस्थानं मधुवारा मधुक्रमाः ॥ मध्वासवो माधवको मधु माध्वीकमद्वयोः ॥ ४१ ॥ मैरे

मद्यविशेषाणां पृथक् पृथगेकैकं द्वे सुराकल्कस्य द्वे वंशांकुरफलादीनूतकाले नानाद्रव्यकृतसुरायाः द्वे सुरामंडस्य

७१ येमासवः शीधुर्मेदको जगलः समौ ॥ सधानस्यादभिषवः किण्वं पुंसितु नग्नहूः ॥ ४२ ॥ करोत्त

मः सुरामंडे आपानं पानगोष्ठिका ॥ चषकोऽस्त्री पानपात्रं सतकोऽप्यनुतर्षणम् ॥ ४३ ॥ धूर्तोक्षदे

द्वे समिल्पपानार्थकृतगोष्ठ्याः चत्वारि मद्यपानपात्रस्य

वी कितवोऽक्षधूर्तो द्यूतकृत्समाः ॥ स्युर्लग्नकाः प्रतिभुवः सविकाद्यूतकारकौ ॥ ४४ ॥ द्यूतोऽस्त्रियाम्

पंच द्यूतकारस्य चत्वारि द्यूतस्य

मक्षवती कैतवं पण इत्यपि ॥ पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते ॥ ४५ ॥ परिणायस्तु शारीणां

द्वे आगिनप्र० द्वे द्यूतकारयितुः

द्वे द्यूतजय्यमानद्रव्यस्य त्रीणि पाशाप्र० एकं शारीणां वामदक्षिणतः समंतान्नयनस्य

७१

Margin notes (left): ...धुरिक्षुरसैःप... पकैरासवोभवे ॥ मैरेयं धातकीपु... गुडधानांबुसंहि... मितिमाध ॥१॥

द्रुशारी शांखेलु नाधारपटस्स द्वेपणपूर्वकमेषककुटा
द्वियोधनरेवनूसं
अत्रवर्गेयोगिकाः शद्बाः

समंतान्भयने स्त्रियाम्॥ अष्टापदं शारिफलं माणिच्यूतं समाव्हयः॥ ४६॥ उक्ताभूरिप्रयोगत्वादे

मालाकार मार्दंगिकवेणविकोरव्र। पुंति प्रचुर प्रयोगदर्शनात् एकस्मिन् लिंगेउक्ताः ते तोऽन्यपि तत छोगव शात्ते

२५ कस्मिं त्रयौगिकाः॥ ताधर्म्यादन्यतो वृत्ताउत्या लिंगांतरेऽपिते॥ ४७॥ इति शूद्रवर्गः समा

पांअन्यतो अन्यत्र जातौ वृत्तौ सत्सां अन्यत्र स्त्रियांक्लीबे चोहनीयाः यथा माला कारी स्त्री मालाकारं कुलमित्या

सः॥ इत्यमरसिंहकृतौ नामलिंगानुशासने॥ भूम्यादिकांडो द्वितीयः सांग एव समा

दि॥ येप्ययौगिकाः करणमालिककुंभकारादयः ते जाति वचन त्वात्कुक्कुटादिवत् जातरिसादिनाडी षिलिंगांतरे स्त्री

र्पितः॥ १॥ इत्यमरसिंहकृतस्यामरकोशस्य द्वितीयः कांडः समाप्तः॥ ७॥ ७॥

लिंगे क्लीबे पि बोद्धव्या

भूमिवर्गस्य श्लोकसंख्या २० पुरवर्गस्य० २२ शैलवर्ग० श्लो० १० वनौषधिव० श्लो० १७२ सिंहादिवर्गस्य श्लो० ४६ नव० श्लो० १४२

ब्रह्मव० श्लो० ६१ क्षत्रिव० श्लो० १२०॥ वैश्यवर्ग० श्लो० ११२ शूद्रवर्ग० श्लो० ४७ सर्वकांडस्यसंख्या ७५३

॥ इत्यमरे द्वितीयकांडः समाप्तः ॥

अथामरतृतीयकांडः प्रारंभः

201

अ० ट०

१

॥श्रीगणेशायनमः॥ ॐ विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि॥ लिंगादिसंग्रहैर्वर्गाः सामान्येवर्गसंश्रयाः॥१॥ स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतंपदैः॥ गुणद्रव्यक्रियाशब्दा

त्रीणिभाग्यसंपन्नस्य ३ द्वेउदारचित्तस्य द्वेप्रशस्तहृदयस्य २

स्तथास्युस्तस्यभेदकाः॥२॥ सुकृतीपुण्यवान्धन्यो महेच्छस्तु महाशयः॥ हृदयालुः सुहृदयो

द्वेदुःखसाधनस्थलेपिउद्यमपरस्य द्वेशाभिज्ञस्य

महोत्साहो महोद्यमः॥३॥ प्रवीणे निपुणाऽभिज्ञविज्ञनिष्णातशिक्षिताः॥ वैज्ञानिकः कृतमु

द्वेपूज्यस्य द्वेसंशयितुःसंशयविषयस्यस्थाण्वादेश्च त्रीणिदक्षिणार्हस्य [illegible]

१०

खः कृती कुशल इत्यपि॥४॥ पूज्यः प्रतीक्ष्यः सांशयिकः संशयापन्नमानसः॥ दक्षिणीयो दक्षि

१

202

चत्वारि अतिदातुः ४ द्वे अल्पायुष्मतः

एाईस्तत्र दक्षिएये इत्यपि ॥ ५ ॥ स्युर्वदान्यस्थूललक्ष्यदानशौंडा बहुप्रदे । जैवातृकः स्यादा

द्वे शास्त्रविदः द्वे परीक्षकस्य द्वे स्वतादेरिष्टफलस्य चत्वारि हृष्टमनसः

युष्मान् तर्वाणिस्तु शास्त्रविदू ॥ ६ ॥ परीक्षकः कारणिको वरदस्तु समर्द्धकः ॥ हर्षमाणो विकुर्वाणः

त्रीणि व्याकुलमनसः द्वे उत्कंठितमनसः त्रीणि कृच्चाशयस्य

प्रमना हृष्टमानसः ॥ ७ ॥ दुर्मना विमना अंतर्मनाः स्यादुत्क उन्मनाः ॥ दक्षिणे सरलोदारौ सुक

एकं दानकर्तेभोक्तुः त्रीणि तात्पर्ययुक्तस्य द्वे पेक्षितार्थउद्युक्तस्य षट् ख्यातमात्रस्य

लौदानृ भोक्तरि ॥ ८ ॥ तत्परे प्रसितासक्तौ विष्टार्थोद्युक्त उत्सुकः ॥ प्रतीते प्रथितख्यातवित्तवि

द्वे आचारसौर्यादिगुणैःख्यातस्य त्रीणि बहुधनस्य द्वे प्रभोः

ज्ञातविश्रुताः ॥ ९ ॥ गुणैः प्रतीते तु कृतलक्षणाहतलक्षणौ ॥ इभ्य आढ्यो धनी स्वामी त्वीश्वरः प

203

अ०
२

द्वे अधिकऋद्धियुक्तस्य श्रीरिकुटुंबासक्तस्य तृ०

निरीरीता॥१०॥ अधिभूर्नायकोनेताप्रभुःपरिवृढोधिपः॥ अधिकर्धिःसमृद्धःस्यात्कुटुंबव्या

एकसुन्दरमावयवयलावण्यवतः

पृतस्तुयः॥११॥ स्यादभ्यागारिकस्तस्मिन्नुपाधिश्चपुमानयम्॥ वरांगरूपोपेतोयः सिंहसंहन

व्यसनेनाभ्युदयेचयदविकारंमनस्तत्वंतत्संपदायुक्तः वाचाररहितस्पृहे द्वे पितृसमस्य

कार्यकर्त्तानयः तस्यके

नोहिसनः॥१२॥ निर्वार्यःकार्य्यकर्त्तायःसंपन्नःसत्वसंपदा॥ अवाचिमूकोथमनोजवःसपितृस

एकसरसालसूतकस्याशुः चत्वारिलक्ष्मीयुक्तस्य

निभेः॥१३॥ सत्कृत्यालंकृतांकन्यांयोददातिसकुकुदः॥ लक्ष्मीवाल्लक्ष्मणःश्रीलःश्रीमान्स्नि

द्वे स्निग्धस्य चत्वारिकृपालोः पंचस्वतंत्रस्य

ग्धस्तुवत्सलः॥१४॥ स्याद्दयालुःकारुणिकःकृपालुःसूरतःसमाः॥ स्वतंत्रोपावृतःस्वैरीस्वच्छंदोनि

२

चत्वारिपराधीनस्य ४

क्षे०

स्वैरग्रहः ॥१५॥ निरंकुशोयथाकामीतथानियंत्रणोपिच ॥ परतंत्रः पराधीनः परवान्नाथवानपि

द्वे स्वलंभुवंचमार्जयतः द्वे चिरक्रियस्य

पंचअधीनमात्रस्य

॥१६॥ अधीनोनिघ्न आयत्तोस्वच्छंदोगृह्यकोप्यसौ ॥ खलपूः स्याद्बहुकरोदीर्घसूत्रश्चिरक्रि

द्वे अविमृश्य कार्यकर्तुः एकं मंदक्रियस्य द्वे कर्मकरणे समर्थस्य एकं कर्मकर्तुमुद्यतस्य

यः ॥१७॥ जाल्मोसमीक्ष्यकारीस्यात्कुंठोमंदः क्रियासुयः ॥ कर्मक्षमोलंकर्मीणः क्रियावांक

द्वे फलमनपेक्ष्य कर्मणिप्रवृत्तिशीलस्य द्वे प्रयत्नेन आरंब्धकर्मपरि समापयितुः द्वे मूल्यं गृहीत्वा कर्मकर्तुः एकं वेतनेन विनाभारवहनादि कर्तुः

र्मसूद्यतः ॥१८॥ सकार्मः कर्मशीलोयः कर्मशूरस्तुकर्मठः ॥ भर्ण्यभुक्कर्मकरः कर्मकारस्तु

द्वे मृतमुद्दिश्य स्नानकर्तुः द्वे मत्स्यमांसभक्षकस्य चत्वारि बुभुक्षोः

तत्क्रियः ॥१९॥ अपस्नातोमृतस्नातआमिषाशीतुशौष्कलः ॥ बुभुक्षितः स्यात्क्षुधितोजिघत्सुरश

५०

206

हूपरान्नजीविनः त्रीणिभक्षणपरस्य द्वेअविजिगीषोः स्वोदरमात्र परकस्य

अ० ... आद्यूनः स्यादौदरिको विजिगीषाविवर्जि मू०

न्नायितः ॥२०॥ परान्नः परपिंडादो भक्षको घस्मरोऽद्मरः ॥ आद्यूनः स्यादौदरिको विजिगीषाविवर्जि

द्वेपोष्यवर्गविलायस्वोदरमात्रपूरकस्य द्वेसर्ववर्णान्नाम [illegible] पंचलुब्धमात्रस्य

२ ते ॥२१॥ उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके ॥ सर्वान्नीनस्तु सर्वान्नभोजी गृध्नुस्तु गर्धनः

द्वेअतिलुब्धस्य द्वेउन्मादशीलस्य द्वेअविनीतस्य

॥२२॥ लुब्धोऽभिलाषुकस्तृष्णक्समौ लोलुपलोलुभौ ॥ सोन्मादस्तून्मदिष्णुः स्यादविनी

त्तारितस्य नवकामुकस्य

तः समुद्धतः ॥२३॥ मत्ते शौंडोत्कटक्षीबाः कामुके कमितानुकः ॥ कम्रः कामयिताभीकः क

क्षेपक

मनः कामनोऽभिकः ॥२४॥ छेको विदग्धे व्यसनि परिभद्रानुप्लुते ॥ वेश्यापतिर्भुजंगः स्या ३

क्षेपक चत्वारि वचने स्थितस्य द्वे वशंगतस्य २

तूरिवंगः पाल्लविकोविटः ॥२५॥ विधेयो विनयग्राही वचने स्थित आश्रवः ॥ वश्यः प्रणेयो नि

त्रीणि विनीतस्य त्रीणि निर्लज्जस्य द्वे नवनवोन्मेषशालिप्रज्ञावतः २ द्वे सलज्जस्य

भृतविनीतः प्रश्रितः समाः ॥२६॥ धृष्टे धृष्णुर्वियातश्च प्रगल्भः प्रतिभान्विते ॥ स्याद्धृष्टे तु

२ द्वे परकीयधर्मशीलाद्धर्षविस्मितस्य द्वे रोगादिभ्यंजनाकुलहृदयस्य चत्वारि भयशीलस्य ४ द्वे उत्पत्त्यर्थं प्रापि सोः

शालीनो विलक्षो विस्मयान्विते ॥२७॥ अधीरे कातरस्त्रस्नुर्भीरुर्भीरुकभीलुकाः ॥ आशंसुरा

द्वे ग्रहणशीलस्य २ एकं श्रद्धायुक्तस्य द्वे पतनशीलस्य २ द्वे लज्जाशीलस्य

शंसितरि गृहयालुर्ग्रहीतरि ॥२८॥ श्रद्धालुः श्रद्धया युक्ते पतयालुस्तु पातुके ॥ लज्जाशीलोऽप

वंदनशीलस्य द्वे २ त्रीणि हिंसाशीलस्य २ द्वे वर्धनशीलस्य द्वे ऊर्ध्वपतनशीलस्य

त्रपिष्णुर्वन्दारुरभिवादके ॥२९॥ शरारुर्घातुको हिंस्रः स्याद्वर्धिष्णुस्तु वर्धनः ॥ उत्पतिष्णुस्तूत्प

208

अ० द्वे अलंकरणशीलस्य त्रीणि साधुभवनशीलस्य द्वे वर्त्तनशीलस्य द्वे साधुनिराकुर्वतः तृ०

नितौऽलंकरिष्णुस्तु मंडनः ॥ ३० ॥ भूष्णुर्भविष्णुर्भविता वर्त्तिष्णुर्वर्त्तनः समौ ॥ निराकरिष्णुः क्षि

४ द्वे निविडचिक्कणस्य त्रीणि ज्ञानशीलस्य द्वे विकाशशीलस्य चत्वारि प्रसरणशीलस्य

प्नुः स्यात्सांद्रस्निग्धस्तु मेदुरः ॥ ३१ ॥ ज्ञाता तु विदुरो विंदुर्विकासी विकस्वरः ॥ विसृत्वरो विसृम तु २

षट् क्षमाशीलस्य त्रीणि क्रोधनस्य

षष्ठ रः प्रसारी च विसारिणि ॥ ३२ ॥ सहिष्णुः सहनः क्षंता तितिक्षुः क्षमिता क्षमी ॥ क्रोधनोऽमर्षणः

द्वे अतिक्रोधनस्य द्वे जागरणशीलस्य द्वे निद्राभ्रांतस्य त्रीणि निद्राशीलस्य

कोपी चंडस्त्वत्यंतकोपनः ॥ ३३ ॥ जागरूको जागरिता घूर्णितः प्रचलायितः ॥ स्वप्नक्शयालुर्निद्रा

द्वे निद्रांगतस्य द्वे विमुखस्य द्वे अधोमुखस्य एकं देवान् पूजयतः गच्छतो वा

लुर्निद्राणशयितौ समौ ॥ ३४ ॥ पराङ्मुखः पराचीनः स्यादवाङप्यधोमुखः ॥ देवानंचति देवद्र्यं ४

एकं सर्वतोगच्छतः एकं सहगच्छतः एकं वक्रगच्छतः त्रीणिविशिष्टवक्तुः

१२ विष्वद्र्यङ् विष्वगंचति ॥ ३५ ॥ यः सहांचति सध्र्यङ् स स तिर्यङ् यस्तिरोंचति ॥ वदोवदाव

१ द्वे अनवद्योद्दामातिपटुवचनस चत्वारि सुष्टुवक्तुः ४ चत्वारि बहुगर्ह्यभाषिणः

दो वक्ता वागीशो वाक्पतिस्समौ ॥ ३६ ॥ वाचोयुक्तिः पटुर्वाग्मी वावदूकोऽतिवक्तरि ॥ स्याज्जल्पा

त्रीणि अप्रियवादिनः ३ द्वे प्रियवादिनः २ द्वे अस्फुटवचनस

कस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ॥ ३७ ॥ दुर्मुखे मुखराबद्धमुखौ शक्लः प्रियंवदे ॥ लोहलः स्या

द्वे कुत्सितवक्तुः द्वे कुकथनशीलस्य २ द्वे काकादिवद्दुःस्वरस्य द्वे शब्दकारिणः

दस्फुटवाग्गर्ह्यवादी तु कद्वदः ॥ ३८ ॥ समौ कुवादकुचरौ स्यादसौम्यस्वरोऽस्वरः ॥ रवणः शब्दनो

द्वे नाटकादौ मंगलार्थमेयादिवादस्य द्वे सर्वकार्यसंमूढस्य एकं वाक्श्रुतिवर्जितस्य द्वे मौनशीलस्य

नांदीवादी नांदीकरः समौ ॥ ३९ ॥ जडोऽज्ञे एडमूकस्तु वक्तुं श्रोतुमशिक्षिते ॥ तूष्णींशीलस्तु

210

अ०　　त्रीणि विवस्त्रस्य　　द्वे गृहादिभ्यो निष्कासितस्य　　द्वे निर्भर्त्सितस्य　　द्वे शत्रुणा गृहीतगर्वस्य　　तृ०

क्षीकोऽनग्नोऽवासा दिगंबरः ॥४०॥ निष्काशितोऽवकृष्टः स्यादपध्वस्तस्तु धिक्कृतः ॥ आत्तगर्वो

५　　द्वे धनादिकं दापितस्य　　चत्वारि हृतनिराकरणस्य

ऽभिभूतः स्याद्दापितः साधितः समौ ॥४१॥ प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ॥ नि

द्वे कृतापकारस्य　　द्वे कृतवंचनस्य　　चत्वारि हृतमनोभंगस्य

कृतः स्याद्विप्रकृतो विप्रलब्धस्तु वंचितः ॥४२॥ मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥ अधि

आहूय प्रेरणे यस्तु अधिक्षेपः स उच्यते　　त्रीणि रज्ज्वादिना संयतचरण　　द्वे आपदं प्राप्तस्य　　द्वे भयात्पलायितस्य

द्वे कृताक्षेपस्य　　स्य बद्धस्य

क्षिप्तः प्रतिक्षिप्तो बद्धे कीलितसंयतौ ॥४३॥ आपन्न आपत्प्राप्तः स्यात्कांदिशीको भयद्रुतः ॥

त्रीणि मिथ्यादूतस्य　　द्वे चलप्रकृतेः　　दैवी मानुषी च पीडा व्यसनं तेन ग्रस्तस्य द्वे　　द्वे शोकादिभिरितिकर्तव्यताशून्यस्य

आशारितः क्षारितोऽभिशस्तः संकसुकोऽस्थिरे ॥४४॥ व्यसनार्त्तोपरक्तौ द्वौ विह्वलस्तु व्याकुलौ समौ ॥　　५

द्वे सांगाम्यधारयि   द्वे आसन्नमरणस्तुचिनलक्षणे   द्वे अपराध्यनताल कशाधा   त्रीणि परवधो द्यतस्य   द्वे व...
नमशुकस्य   मृदं चितमतेः   तमर्हतः

विक्लवो विह्वलः स्यात्तु विवशोऽरिष्टदुष्टधीः ॥४५॥ कश्यः कशार्हे संनद्धे त्वाततायी वधोद्यते ॥ द्वेष्ये

द्वे वधार्हस्य   एकं विषेण वध्यस्य   एकं मुसलेन वध्यस्य

त्वक्षिगतो वध्यः शीर्षछेद्यश्च यौ समौ ॥४६॥ विष्यो विषेण यो वध्यो मुसल्यो मुसलेन यः ॥ शिश्वि

द्वे अपापकर्मणः   शेषमनिश्चि सव धोरि कार्यमाचरतः   द्वे   दोषैकदृष्टेः

दानोऽकृष्णकर्मा चपलश्चिकुरः समौ ॥४७॥ चलाचलः स्याच्चरलश्चांचलश्चंचलश्चलः ॥ दोषैक

द्वे कर्णेजपिलाषरापकारंवदतः   त्रीणि परस्मिरहनशीलस्य
त्रीणि वक्राचारस्य

दृक्पुरोभागी निकृतस्त्वनृजुः शठः ॥४८॥ कर्णेजपः सूचकः स्यात्पिशुनो दुर्जनः खलः ॥ नृशं

चत्वारि परद्रोहकारिणः   ४ द्वे स्वभाववंचकस्य   षट् मूर्खस्य   द्वे पंच कृपणस्य

सो घातुकः क्रूरः पापो धूर्तस्तु वंचकः ॥४९॥ अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ॥ कदर्ये क

212

अ०
६

पंचदरिद्रस्य ५ पंचयाचकस्य

पणः क्षुद्रः किंपचानमितंपचौ ॥५०॥ निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ॥ वनीयको याच-

द्वे अहंकारयुक्तस्य ५ । २ द्वे शुभयुक्तस्य एकं देवानां अस्य त्रिलिंगत्वादेव पर्याया विन ... नोक्ताः

नको मार्गणो याचकार्थिनौ ॥५१॥ अहंकारवानहंयुः शुभंयुस्तु शुभान्वितः ॥ दिव्योपपादुका

एकं नृगोखराश्वादेः एकं कृमिदंशमशकादीनां एकं पक्षिसर्पपिपीलिकादीनां

देवा नृगवाद्या जरायुजाः ॥५२॥ स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः ॥ उद्भिदस्तरु-

तरुगुल्मलतादीनां उद्भिदादि चतुष्कं वाच्यं द्वादश सुंदरस्य

गुल्माद्या उद्भिदुद्भिज्जमुद्भिदम् ॥५३॥ सुंदरं रुचिरं चारु सुषमं साधु शोभनम् ॥ कांतं मनो-

१२ क्षेपक क्षेपक एकं यस्य दर्शनात् तृप्तिः समाप्तिः स्तितस्य

हरं रुच्यं मनोज्ञं मंजु मंजुलम् ॥५४॥ रम्यं मनोरमं सौम्यं भद्रकं रामणीयकम् ॥ तदासेचनकं

६

षट्प्रियस्य ६ त्रयोदशाधमस्य

तमेचीरस्युतोयस्यदर्शनात्॥५५॥ अभीष्टेऽभीप्सितंहृद्यंदयितंवल्लभंप्रियम्॥ निकृष्टप्रतिकृष्टार्वरेफया

१५ चत्वारिमलीनस्य

प्याव्यमाधमाः॥५६॥ कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः॥ मलीमसंतुमलिनंकच्चरंमलदूषि

४ त्रीणिपवित्रस्य द्रव्यभावनिर्मलस्यवस्तुनः पंचापनीतमलस्य ५

तम्॥५७॥ पूतंपवित्रंमेध्यंचवीध्रंतुविमलात्मकम्॥ निर्णिक्तंशोधितंमृष्टंनिःशोध्यमनवस्करम्॥

असारस्य ३ चत्वारिशून्यस्य ४ सप्तदशप्रधानस्य

॥५८॥ असारंफल्गुशून्यंतुवशिकंतुच्छरिक्तके॥ क्लीबेप्रधानंप्रमुखप्रवेकाऽनुत्तमोत्तमाः॥५९॥ मुख्य

वर्यवरेण्याश्चप्रवर्होऽनवरार्ध्यवत्॥ परार्ध्याग्र्यप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम्॥६०॥ श्रेया

एते व्याघ्रादयः उत्तरपदस्थाः पुंसि श्रेष्ठार्थगोचराः स्युः श्रेष्ठसमर्थगोचरा नृ०

पंचातिशोभनस्य वाचकोयं षांते

अ०
७

नृश्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥ स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुंजराः ॥ ६१ ॥ सिंहशार्दूल

क्षेपक त्रीण्यप्रधानस्य क्षेपक नवविस्तीर्णस्य

नागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ॥ ६२ ॥ विशंकटं पृथु बृहद्

१ चत्वारिस्थूलस्य ४ चतुर्दशाल्पस्य

विशालं पृथुलं महत् ॥ वड्रोरु विपुलं पीनं पीव्नी तु स्थूलं पीवरे ॥ ६३ ॥ स्तोकाल्पक्षुल्लकाः श्लक्ष्णं सूक्ष्मं

१४ क्षे० पंचाल्पतरस्य

दभ्रं कृशं तनु ॥ स्त्रियां मात्रा त्रुटी पुंसि लवलेशकणाणवः ॥ ६४ ॥ अत्यल्पेऽल्पिष्ठमल्पीयः कनी

क्षेपक द्वादशप्रचुरस्य

यो णीय इत्यपि ॥ प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ॥ ६५ ॥ पुरुहूं पुरु भूयिष्ठं स्फारं भूयश्च ७

शतादिकात् शतात् सहस्रात् परा उत्तरा संख्या येषां संख्ये यानां ते परः शताः आद्येन परः सहस्राः द्वे शक्यगनस्य द्वे स्तगणनस्य

१२

भूरि च ॥ परश्शताद्यास्ते येषां परा संख्या शतादिकात् ॥ ६६ ॥ गणनीये तु गणेयं संख्याते गणितं

चतुर्दश सर्वस्य

मथ समं सर्वम् ॥ विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् ॥ ६७ ॥ समग्रं सकलं

१४ त्रीणि निरंतरस्य त्रीणि विरलस्य पंचदश निकटस्य

पूर्णमखंडं स्यादनूनके । घनं निरंतरं सांद्रं पेलवं विरलं तनु ॥ ६८ ॥ समीपे निकटाऽऽसन्नसन्नि

२९

कृष्टसनीडवत् ॥ सदेशाऽभ्याशसविधसमर्यादसवेशवत् ॥ ६९ ॥ उपकंठांऽतिकाऽभ्यर्णाऽभ्य

१५ त्रीणि संलग्नस्य द्वे अतिनिकटस्य २ द्वे दूरस्य

ग्रा अप्यभितोऽव्ययम् ॥ संसक्तं त्वव्यवहितमपदांतरमित्यपि ॥ ७० ॥ नेदिष्ठमंतिकतमं स्याद्दूरं

अ० ८ | ध्रुवस्वभावाद्यचुन्नतमुपाधि

त्रीण्यतिदूरस्य | दूरदीर्घस्य | त्रीणिवर्तुलस्य | वशादीषन्नतंतस्य

विप्रकृष्टकम्॥ दवीयश्च दविष्ठं सुदूरं दीर्घमायतम्॥ ७१॥ वर्तुलं निस्तलं वृत्तं बंधुरं तून्नतानतम्

त्रीणि नतस्य अवनतानतामिति द्वंद्वेन नाम द्वयं | षट् उच्चस्य | पंचखर्वस्य

म्॥ उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगेऽथ वामने॥ ७२॥ न्यग्नीचखर्वह्रस्वाः स्युरवाग्रेऽवनतानत

एकादशवक्रस्य

नतम्॥ अरालं वृजिनं जिह्ममूर्मिमत्कुंचितं नतम्॥ ७३॥ आविद्धं कुटिलं भुग्नं वेल्लितं वक्रमित्य

त्रीणि अवक्रस्य | त्रीण्याकुलस्य क्रमविरहादेकी भवतः | पंचनित्यस्य

पि॥ ऋजावजिह्मप्रगुणौ व्यस्ते त्वप्रगुणाकुलौ॥ शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः॥

एकरूपतया तु यः कालव्यापकः सः | एकं गोमहिष्यादि भिन्नसह | षट् जंगमस्य

त्रीण्यतिस्थिरस्य | नृतिष्ठति यः आत्माकाशादि | क्षपाषाणादिः

स्थास्नुः स्थिरतरस्थेयानेकरूपतया तु यः॥ कालव्यापी स कूटस्थः स्थावरो जंगमेतरः॥ चरिष्णु ८

द्वाचंचलस्य ६

जंगमं चरं त्रसमिंगं चराचरम् ॥ ७६ ॥ चलनं कंपनं कंप्रं चलं लोलं चलाचलम् ॥ चंचलं तरलं चैव

१० द्वे अधिकस्य २ द्वे दृढसंधानस्य नव कठिनस्य

पारिप्लवपरिप्लवे ॥ ७७ ॥ अतिरिक्तः समधिको दृढसंधिस्तु संहतः ॥ कर्कशं कठिनं क्रूरं कठोरं ३ खटं

९ त्रीणि प्रवृद्धस्य पंच पुरातन ५

निष्ठुरं दृढम् ॥ ७८ ॥ जठरं मूर्तिमन्मूर्तं प्रवृद्धं प्रौढमेधितम् ॥ पुराणे प्रतनं प्रत्नपुरातनं चिरंतनाः ॥

सप्त नूतनस्य ७ चत्वारि कोमलस्य ४ चत्वारि अनुगस्य

॥ ७९ ॥ प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः ॥ नूत्नश्च सुकुमारं तु कोमलं मृदुलं मृदु ॥ ८० ॥ अन्व

४ द्वे प्रत्यक्षज्ञातस्य २ द्वे अतींद्रियस्य २ समानन्यवृत्तेः

गन्वक्षमनुगेऽनुपदं क्लीबमव्ययम् ॥ प्रत्यक्षं स्यादैंद्रियकं मप्रत्यक्षमतींद्रियम् ॥ ८१ ॥ एकतानोऽनन्यवृ

अ० ८०

पंचाद्यस्य

निरेकाग्रैकायनावप्यपि॥ अप्येकसर्गएकाग्र्योऽप्येकायनगतोऽपि च॥ ८२॥ पुंस्यादिः पूर्वपौरस्त्यप्र

षडंतस्य द्वे निरर्थकस्य

थमाऽऽद्यो अथाऽस्त्रियाम्॥ अंतोजंघन्यं चरममंत्यपाश्चात्यपश्चिमम्॥ ८३॥ मोघं निरर्थकंस्य

चत्वारिस्पष्टस्य द्वे एकस्यानेकसंबंधिनः त्रीण्यसहायस्य षट्भिन्नस्य

स्पष्टंस्फुटंप्रव्यक्तमुल्वणम्॥ साधारणंतुसामान्यमेकाकीत्वेकएककः॥ ८४॥ भिन्नार्थकाएकतर अन्य

द्वे औनेकप्रकारस्य द्वे त्वरायुक्तस्य द्वे मर्मपीडकस्य

एकस्त्वोऽन्येतरावपि॥ उच्चावचंनैकभेदमुच्चंडमविलंबितम्॥ ८५॥ अरुंतुदंतुमर्मस्पृग

द्वे अबाधितस्य चत्वारिप्रतिकूलस्य एकसव्यांगस्य

बाधंतुनिरर्गलम्॥ प्रसव्यंप्रतिकूलंस्यादपसव्यमपष्ठु च॥ ८६॥ वामंशरीरंसव्यंस्यादपस

द्वे दक्षिणांगस्य द्वे अस्यावकाशमागादि: द्वे दुष्प्रवेशस्य त्रीणि जनादिभिर्निरंतकाशस्य द्वे लूनकेशखंडनस्य

व्यं तु दक्षिणम् ॥ संकटं ना तु संबाधः कलिलं गहनं समे ॥ ८७ ॥ संकीर्णे संकुलाकीर्णे मुंडितं प

त्रीणि ग्रथितस्य त्रीणि विस्तृतस्य द्वे विस्मृतस्य द्वे वांछितस्य स्थापितस्य वा

रिवापितम् ॥ ग्रथितं संदितं दृब्धं विसृतं विस्तृतं ततम् ॥ ८८ ॥ अंतर्गतं विस्मृतं स्यात्प्राप्तप्रणिहि

षट् कंपितस्य द्वे सप्त क्षिप्तस्य

ते समे ॥ वेल्लितप्रेंखिताधूतचलिताकंपिता धुते ॥ ८९ ॥ नुत्तनुन्नास्तनिष्ठ्यूताविद्धक्षिप्तेरि

ताः समाः ॥ परिक्षिप्तं तु निवृतं मूषितं मुषितार्थकम् ॥ ९० ॥ प्रवृद्धप्रसृते न्यस्तनिसृष्टे गुणिताह

ते ॥ निदिग्धोपचिते गूढगुप्ते गुंठितरूषिते ॥ ९१ ॥ द्रुतावदीर्णे उद्गूर्णोद्यते काचितशिक्यिते ॥ घ्रा

220

अ०
१०

णघ्राते दिग्धलिप्ते समुदक्तोद्धृते समे ॥९२॥ वेष्टितं स्याद्वलयितं संवीतं रुद्धमावृतम् ॥ रुग्णं भुग्नेऽथ

निशितक्ष्णुतशातानि तेजिते ॥९३॥ स्याद्विनाशोन्मुखं पक्वं ह्रीणह्रीतौ तु लज्जिते ॥ वृत्ते तु वृत्तवावृत्तौ

सं‍योजित उपाहितः ॥९४॥ प्राप्यं गम्यं समासाद्यं स्यन्नं रीणं स्रुतं स्रुतम् ॥ संगूढः स्यात्संक

लितोऽवगीतः ख्यातगर्हणः ॥९५॥ विविधः स्याद्बहुविधो नानारूपः पृथग्विधः ॥ अवरीणो धि

क्कृतश्चाप्यवध्वस्तोऽवचूर्णितः ॥९६॥ अनायासकृतं फाण्टं स्वनितं ध्वनितं समे ॥ बद्धे संदानितं

तृ०
ल१
१०

मृतमुदितं संहितं सितम् ॥९७॥ निष्पक्वं क्वथितं पाके क्षीराऽऽज्यपयसां शृतम् ॥ निर्वाणो मुनिवन्ह्यादौ

निर्वातस्तु गतेऽनिले ॥९८॥ पक्वं परिणते गूनं हन्ने मीढं तु मूत्रिते ॥ पुष्टं तु पुषितं सोढे क्षांतमुद्वांतमु

द्गते ॥९९॥ दांतस्तु दमिते शांतः शमितं प्रार्थितेऽर्दितः ॥ ज्ञप्तस्तु ज्ञपिते छन्नश्छादिते पूजितेंऽचितः ॥

॥१००॥ पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः ॥ प्रुष्टप्लुष्टोषिता दग्धे तष्टत्वष्टौ तनूकृते ॥१०१॥

वेधितच्छिद्रितौ विद्धे विन्नवित्तौ विचारिते ॥ निष्प्रभे विगताऽरोकौ विलीने विद्रुतद्रुतौ ॥१०२॥ सिद्धे नि

तृ०

अ० ११

वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ ॥ ऊतं स्यूतमुतं चेति त्रितयं तंतुसंतते ॥ १०३ ॥ स्यादर्हितेनम
स्यितनमसितमपचायितार्चितापचितम् ॥ वरिवसिते वरिवस्यितमुपासितं चोपचरितं च ॥ १०४ ॥
संतापितस्तु संतप्तो धूपितधूपायितौ च दूनश्च ॥ हृष्टो मत्तः स्तृप्तः प्रह्लन्नः प्रमुदितः प्रीतः ॥ १०५ ॥
छिन्नं छातं लूनं कृत्तं दातं दितं छितं वृक्णम् ॥ स्रस्तं ध्वस्तं भ्रष्टं स्कन्नं पन्नं च्युतं गलितम् ॥ १०६ ॥
लब्धं प्राप्तं विन्नं भावितमासादितं च भूतं च ॥ अन्वेषितं गवेषितमन्विष्टं मार्गितं मृगितम् ॥ १०७ ॥ ११

आर्द्रस्मार्द्रक्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च ॥ स्नातं चाप्लुतं रक्षितम् अवितं गोपायितं गुप्तम् ॥ १०८ ॥ अवगणितमवमतावज्ञाते अवमानितं च परिभूते ॥ त्यक्तं हीनं विधुतं समुज्झितं धूत- मुत्सृष्टम् ॥ १०९ ॥ उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम् ॥ बुद्धं बुधितं मनितं विदितं प्रतिपन्नमवसितावगते ॥ ११० ॥ ऊरीकृतमुररीकृतमङ्गीकृतमाश्रुतं प्रतिज्ञातम् ॥ संगीर्णविदितसंश्रुतसमाहितोपश्रुतोपगतम् ॥ १११ ॥ ईलितशस्तपणायितपनायितप्रणुत-

क्षि २

अ०
१२

पणितपनितानि॥ अपिगीर्णवर्णिताः भिष्टुतेडितानिस्तुतार्थानि॥११२॥ भक्षितचर्वितलिप्त

प्रत्यवसितगिलितखादितप्सातम्॥ अभ्यवहृतान्नजग्धग्रस्तग्लस्ताशितंभुक्ते॥११३॥

क्षेपिष्ठक्षोदिष्ठप्रेष्ठवरिष्ठस्थविष्ठबंहिष्ठाः॥ क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः॥

॥११४॥ साधिष्ठद्राघिष्ठस्फेष्ठगरिष्ठह्रसिष्ठवृंदिष्ठाः॥ वाढव्यायतबहुगुर्वामनवृंदारकाः

तिशये॥११५॥ इतिविशेष्यनिघ्नवर्गः समासैःप्रकृतिप्रत्ययार्थाद्यैः संकीर्णलिंगमुन्नेयम्॥

तृ०

१२

कर्मक्रियातत्सातत्ये गम्ये स्युरपरस्पराः ॥१॥ साकल्यासंगवचने पारायणतुरायणे । यदृच्छा स्वैरिता

हेतुशून्या त्वास्था विलक्षणम् ॥२॥ शमथस्तु शमः शांतिर्दांतिस्तु दमथो दमः । अवदानं कर्मवृत्तं

काम्यदानं प्रवारणम् ॥३॥ वशक्रिया संवननं मूलकर्म तु कार्मणम् । विधूननं विधुवनं तर्पणं प्रीण

नाऽवनम् ॥४॥ पर्य्याप्तिः स्यात्परित्राणं हस्तवारणमित्यपि । सेवनं सीवनं स्यूतिर्विदरः स्फुटनं भि

दा ॥५॥ आक्रोशनमभीषंगः संवेदो वेदना न ना । संमूर्छनमभिव्याप्तिर्याच्ञा भिक्षाऽर्थनाऽर्दना ॥६॥

अ०
१३

तृ०

नर्द्दनं छेदनेऽथ द्वे आनंदनसभाजने। आमच्छनमथाऽऽम्नायः संप्रदायः क्षये क्षिया ॥७॥ ग्रहे
ग्राहो वशः कांतौ रक्षणः स्त्राणे रणः क्वणे ॥ व्यधो वेधे पचा पाके हवो हूतौ वरो वृतौ ॥८॥ ओषः प्लोषे नयो
नाये ज्यानिर्जीर्णौ भ्रमो भ्रमौ। स्फातिर्वृद्धौ प्रथाख्यातौ स्पृष्टिः पृक्तौ स्नवः स्रवे ॥९॥ एधा समृद्धौ स्फुरणे
स्फुरणा प्रमितौ प्रमा। प्रसूतिः प्रसवे श्च्योते प्राघारः क्लमथः क्लमे ॥१०॥ उत्कर्षोऽतिशये संधिः श्लेषे
विषय आश्रये। क्षिपायां क्षेपणं गीर्णिर्गिरौ गुरणमुद्यमे ॥११॥ उन्नाय उन्नये श्रायः श्रयणे जयने ज

१३

यः॥ निगादो निगदे मादो मद उद्वेग उद्भ्रमे॥१२॥ विमर्दनं परिमलोऽभ्युपपत्तिरनुग्रहः॥ निग्रहस्तु
निरोधः स्यादभियोगस्त्वभिग्रहः॥१३॥ मुष्टिबंधस्तु संग्राहो डिंबे डमरविप्लवौ॥ बंधनं प्रसितिश्चा
रः स्पर्शः स्प्रष्टोपतप्तरि॥१४॥ निकारो विप्रकारः स्यादाकारस्त्विंग इंगितम्॥ परिणामो विकारो द्वे
समे विकृतिविक्रिये॥१५॥ अपहारस्त्वपचयः समाहारः समुच्चयः॥ प्रत्याहार उपादानं विहारस्तु प
रिक्रमः॥१६॥ अभिहारोऽभिग्रहणं निर्हारोऽभ्यवकर्षणम्॥ प्रवाहस्तु प्रवृत्तिः स्यात्प्रवहो गमनं बहिः॥१७॥

अनुहारोऽनुकारः स्यादर्थस्यापगमे व्ययः

अ०
१४

तृ०

वियामो वियमो यामो यमः संयामसंयमौ ॥१८॥ हिंसाकर्माभिचारः स्याज्जागर्या जागरा द्वयोः ॥
विघ्नोऽन्तरायः प्रत्यूहः स्यादुपघ्नोऽन्तिकाश्रये ॥१९॥ निर्वेश उपभोगः स्यात्परिसर्पः परिक्रिया ॥ विधुरं तु
प्रविश्लेषोऽभिप्रायश्छंद आशयः ॥२०॥ संक्षेपणं समसनं पर्यवस्था विरोधनम् ॥ परिसर्या परीसा
रः स्यादास्या त्वासना स्थितिः ॥२१॥ विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः ॥ संवाहनं मर्दनं स्या
द्विनाशः स्याददर्शनम् ॥२२॥ संस्तवः स्यात्परिचयः प्रसरस्तु विसर्पणम् ॥ नीवाकस्तु प्रयामः स्यात्

१४

न्निधिः सन्निकर्षणम्॥२३॥ लवोऽभिलावो लवने निष्पावः पवने पवः॥ प्रस्तावः स्यादवसरस्त्रसरः सूत्रवेष्टनम्॥२४॥ प्रजनः स्यादुपसरः प्रश्रयप्रणयौ समौ॥ धीशक्तिर्निष्क्रमोऽस्त्री तु संक्रमो दुर्गसंचरः॥२५॥ प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रमः॥ स्यादभ्यादानमुद्घात आरंभः संभ्रमस्त्वरा॥२६॥ प्रतिबंधः प्रतिष्टंभोऽवनायस्तु निपातनम्॥ उपलंभस्त्वनुभवः समालंभो विलेपनम्॥२७॥ विप्रलंभो विप्रयोगो विलंभस्त्वतिसर्जनम्॥ विश्रावस्तु प्रतिख्यातिरवेक्षा प्र

अ०
१५

तृ०

ति जागरः॥२८॥ निपाठनिपठौ पाठे तेमस्तेमौ समुंदने॥ आदीनवाऽऽश्रवौ क्लेशे मेलके संगसंग
मौ॥२९॥ संवीक्षणं विचयनं मार्गणं मृगणा मृगः॥ परिरंभः परिषंगः संश्लेष उपगूहनम्॥३०॥
